शब्दे तदुद्भवकथा । अग्निसम्भवे त्रि० । स्वर्णे न० ह्रस्वान्तः । अग्निभवादयोऽप्यत्र ।

**अग्निभूति** पु० अग्निरिव भूतिः तेजस्वित्वादैश्वर्य्यमस्य । बौद्धभेदे हेम० । पावकविभूत्यां तद्वीर्य्ये च स्त्री । हेम० । वह्निसम्भवे त्रि० ।

**अग्निभ्राजस्** त्रि० अग्निरिव भ्राजते भ्राज-असुन् । वह्नितुल्यदीप्तियुक्ते । 'अग्निभ्राजसोविद्युतो गर्भस्य इति' वेदः ।

**अग्निमणि** पु० अग्नेरुत्थापकोमणिः शा० त० । सूर्य्यादितैजसद्रव्यसम्पर्कात् अग्न्युत्थापके सूर्य्यकान्ताभिधे मणौ ( आतसी ) (चकमकीति) ख्याते प्रस्तरे च ।

**अग्निमत्** पु० अग्निराधानादस्त्यस्य मतुप् । यथाविधानेनाहिताग्निके साग्निके द्विजे "दारास्वग्निं विनिःक्षिप्य प्रवसेदनग्निमान् द्विजः" इति स्मृतिः ।

**अग्निमथ्** पु० अग्निं मथ्नाति अरणिद्वयघर्षणेन निष्पादयति मन्थ—क्विप् नलोपः । अग्न्याधानार्थमरणिद्वयघर्षणेन वह्निसम्पादके याज्ञिके । करणे क्विप् । अग्निमन्थसाधने मन्त्रे, अरणिकाष्ठे च त्रि० ।

**अग्निमन्थ** पु० अग्निर्मथ्यतेऽनेन मन्थ-करणे घञ् । गणिकारीवृक्षे ( गणियारि ) तत्काष्ठयोर्घर्षणे हि आशु वह्निरुद्भाव्यते । तन्मन्थनसाधने मन्त्रे च । करणे ल्युट् हेम० । अग्निमन्थनोऽप्युक्तार्थे त्रि० स्त्रियां ङीप् ।

**अग्निमान्द्य** न० अग्नेर्जठरानलस्य मान्द्यं पाचनकुण्ठता । धातुवैषम्येण जठरानलस्य पाचनशक्तिराहित्ये "अग्नीश्वरस्य भक्तानां न विद्युदग्निजं भयम् अग्निमान्द्यभयं नैवेति" काशीखण्डः । अग्निमान्द्येऽजीर्णता स्यात् तत्राल्पभोजनं कार्य्यं यथा । 'मुहुर्मुहुरजीर्णेऽपि भोज्यमस्योपकल्पयेत् इति चक्र० । तत्कारणमुक्तम् । स्नेहपीतस्य वान्तस्य विरिक्तस्य स्रुतासृजः । निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥ सोऽन्नैरत्यर्थगुरुभिरुपयुक्तैः प्रशाम्यति । अल्पोमहद्भिर्बहुभिर्म्लादितोऽग्निरिवेन्धनैः ॥ सचाल्पैर्लघुभिश्चान्नैरुपयुक्तैर्विवर्द्धते । काष्ठैरणुभिरल्पैश्च सन्धुक्षित इवानलः ॥ कृतदोषप्रमाणेन सदाहारविधिःस्मृत' इति सुश्रुते ।

**अग्निमारुति** अग्निश्च मरुच्च तयोरपत्यं वाह्वादेराकृतिगणत्वादिञ् ततो वृद्धिः देवताद्वन्द्वे च आनङं बाधित्वा 'इद्वृद्धाविति' इत् "देवताद्वन्द्वे च" इति द्विपदवृद्धौ ष्ट० पूर्व्वपदस्य ह्रस्वः । अगस्त्ये मुनौ तस्य च कल्पान्तरे ताभ्यामुत्पत्तिरनुसन्धेया ।

**अग्निमुख** पु० अग्निर्मुखमिव यस्य । देवे । हुतद्रव्यं हि देवैरग्निरूपमुखद्वारेणैवाश्यते । "हव्यं वहति देवानामिति" श्रुतेस्तत्रैव तात्पर्य्यात् । "अग्निमुखा वै देवा" इति "अग्निर्मुखं प्रथमं देवतानामिति च" श्रुतिः । अग्निर्मुखेऽग्रेऽस्य । देवे, "अग्निरग्ने प्रथमं देवानामिति" श्रुतौ वह्नेरेव देवानामग्रोत्पत्तेस्तथात्वम् । यथा चाग्नेर्देवमुखत्वं तदादित्वञ्च तथाऽग्निशब्दे निरुक्तव्याख्याने ऋग्वेदभाष्ये प्राक् दर्शितम् अग्निधिकमग्निहोत्रशब्दे वक्ष्यते । अग्निर्मुखं प्रधानमुपास्यो यस्य । अग्निहोत्रिणि द्विजे । अग्निः दाहकत्वात् शापाग्निर्मुखे यस्य । विप्रे "वाग्वज्रा वै विप्रा" इति श्रुतौ तेषां वाग्वज्रत्वकथनात् अग्निमुखत्वम् । अग्निरिव स्पर्शात् दुःखदायकं मुखमग्रमस्य । भल्लातकवृक्षे (भेला) चित्रकवृक्षे च । तन्निर्य्यासस्पर्शेन हि देहे क्षतोत्पत्तेस्तयोस्तथात्वम् । अग्नेः जठरानलस्य मुखं द्वारम् । वैद्यकोक्ते चूर्णभेदे न० यथा "हिङ्गुभागो भवेदेको वचा च द्विगुणा भवेत् । पिप्पली त्रिगुणा चैव शृङ्गवेरं चतुर्गुणम् ॥ यमानिका पञ्चगुणा षड्गुणा च हरीतकी । चित्रकं सप्तगुणितं कुष्ठञ्चाष्टगुणं भवेत् ॥ एतद्वातहरं चूर्णं पीतमात्रं प्रसन्नकृत् । पिबेद्दध्ना मस्तुना वा सुरया कोष्णवारिणा ॥ सोदावर्त्तमजीर्णञ्च प्लीहानमुदरन्तथा अङ्गानि यस्य शीर्य्यन्ते विषं वा येन भक्षितम् ॥ अर्शोहरं दीपनञ्च श्लेष्मघ्नं गुल्मनाशनम् । कासं श्वासं निहन्त्याशु तथैव यक्ष्मनाशनम् ॥ चूर्णमग्निमुखं नाम न क्वचित् प्रतिहन्यते" इति चक्रदत्तः ।

**अग्निमुखी** स्त्री अग्निरिव मुखमग्रं यस्याः गौरादित्वात् ङीष् । (भेला) भल्लातकवृक्षे, लाङ्गलिकावृक्षे (विषलाङ्गला) अग्निरेव मुखं मुखत्वेन कल्पितं यस्याः गौरा० । गायत्रीमन्त्रे । "कदाचिदपि नो विद्वान् गायत्रीमुदके जपेत् । गायत्र्यग्निमुखी यस्मात्तस्मादुत्थाय तां जपेदिति" गोभिलः । तस्याश्च "सोऽकामयत यज्ञं सृजेयेति स मुखत एव त्रिवृतमसृजत तं गायत्री छन्दोऽन्वसृज्यताग्निर्देवता ब्राह्मणोमनुष्योवसन्तऋतुस्तस्मात् त्रिवृत् स्तोमानां मुखं, गायत्री च्छन्दसामग्निर्देवानमिति" श्रुतौ । अग्निना समं प्रजापतिमुखजातत्वात् तथात्वम् । अस्मिंश्च पक्षे । अग्नेरिव मुखं प्रजापतिमुखं मुखमुत्पत्तिद्वारमस्या इति विग्रहः गौरा० । गायत्रीमन्त्रश्च गायत्रीशब्दे वक्ष्यते । विप्रे तु पु० । अग्निरिव उत्तप्तं मुखं यस्याः गौ० ङीष् । पाकशालायाम् स्त्री अग्निर्मुखमाद्यो यस्य अग्निप्रभृतौ देवे त्रि० ।